**क्षमाभुज्** पु० क्षमां भुनक्ति भुज—अवने क्विप् । नृपे "सुरवैरिवक्ष उरसि क्षमाभुजः" माघः । क । क्षमाभुजोऽप्यत्र

**क्षमावत्** त्रि० क्षमा+अस्त्यर्थे मतुप् मस्य वः । क्षमायुक्ते । "एकः क्षमावतां दोषो द्वितीयो नोपपद्यते । यदेनं क्षमया युक्तमशक्तं मन्यते जनः" गरु० पु० ११४अ० स्त्रियां ङीप्

**क्षमितृ** त्रि० क्षम—तृच् । सोढरि सहनशीले अमरः

**क्षमिन्** त्रि० क्षम-ताच्छील्ये घिनुण् । क्षमाशीले "क्षामं क्षास्यतु यः क्षमी" माघः "अक्रूरः पेशलो दक्षोदक्षिणः क्षमिणां वरः" विष्णुस० स्त्रियां ङीप् ।

**क्षय** पु० क्षि—क्षये क्षि—निवासगत्योर्वा भावादौ यथायथम् अच् । त्रिवर्गान्तर्गते नीतिवेदिनां राज्ञाम् १अष्टवर्गापचये । अष्टवर्गश्च । "कृषिर्वणिक्पथो दुर्गं सेतुकुञ्जरबन्धनम् । खन्याकरः करादानं सैन्यानाञ्च निवेशनम् । अष्टवर्गः स्मृतो राज्ञाम्" भरतः । "क्षयस्थानं च वृद्धिश्च त्रिवर्गो नीतिवेदिनाम्" अमरः । क्षयः अष्टवर्गस्यापचयः तस्यैवोपचयः वृद्धिः, स्थानं तस्य उपचयापचयहीनतया स्थितिः" २प्रलये तस्मिन् सर्व्वेषां क्षयात्तथात्वम् । ३अपचये स च भावविकारभेदः यास्कोक्तः यथा

"षड् भावविकारा भवन्तीति वार्ष्यायणिः जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति । जायत इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधति, अस्तीत्युत्पन्नस्य सत्त्वस्यावधारणं, विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारं, वर्धत इति स्वाङ्गाभ्युच्चयं, सांयौगिकानां कर्म्मणा वर्धते विजयेनेति वा वर्धते शरीरेणेति वा, अपक्षीयत इत्यनेनैव व्याख्यातः प्रतिलोमं, विनश्यतीत्यपरभावस्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति" । ४गृहे अमरः ५यक्ष्मरोगे यक्ष्मरोगस्य क्षयसंज्ञाकारणं यथा "क्रियाक्षयकरत्वाच्च क्षय इत्युच्यते बुधैः । राज्ञश्चन्द्रमसो यस्मादभूदेष महामयः । तस्मात्तं राजयक्ष्मेति केचिदाहुर्मनीषिणः" सुश्रु० । "रक्तपित्तात्भवेत् कासः कासात् संजायते क्षयः" वैद्यकम् "राजयक्ष्मपरिहाणिमाययौ" इत्युपक्रमे "राज्ञि तत् क्षणमभूत् क्षयातुरे" रघुः । ६रोगमात्रे राजनि० । षष्टिवर्षान्तर्गते षष्टितमे ७वर्षे तल्लक्षणं ज्यो०त० भवि०पु० "मेदिनी लभते देवि ! सर्वभूतं चराचरम् । देशभङ्गश्च दुर्भिक्षं क्षये संक्षीयते प्रजा । सौराष्ट्रे मालवे देशे दक्षिणे कोङ्कणे तथा । दुर्भिक्षं जायते घोरं क्षये संवत्सरे प्रिये ! । कौमुदीनर्म्मदाद्याश्च यमुनानर्म्मदातटम् । विन्ध्यायां सैन्धवस्यापि विनश्यतीति न संशयः । सिंहलो मध्यदेशश्च कालञ्जरस्तथैव च । क्षये क्षयन्ति सर्वाणि नान्यथा वरवर्णिनि !" ।

ता० ब्राह्मणोक्ते ८स्तोत्रसंघे ६देवसंघे च यथा "रश्मिरसि क्षयाय त्वा क्षयं जिन्व सवितृप्रसूता बृहस्पतये स्तुत" ता०ब्रा० "तैत्तिरीयाणां पञ्चमकाण्डोक्तब्राह्मणे रश्मिरिति मन्त्रस्यामादित्यादिवृष्टिहेतुत्वाभिधानादादित्यादिपरतया रश्म्यादिशब्दाव्याख्येयाः तत्तु ब्राह्मणमुत्तरत्रोदाहरिष्यते । हे आदित्य ! त्वं रश्मिरसि रश्मियुक्तोऽसि देवा यस्मिन् क्षियन्ति निवसन्ति इति स्तोत्रसंघः क्षयः तस्मै क्षयाय तत्सङ्घाय तत्प्राप्त्यर्थं हे आदित्य ! त्वां स्मरामीति शेषः । ततः क्षयं देवसङ्घञ्जिन्व प्रीणय क्षयशब्दस्य देवविषयत्वं तैत्तिरीयास्तृतीयकाण्डोक्तब्राह्मणे समामनन्ति "रश्मिरसि क्षयाय त्वा क्षयं जिन्वेत्याह देवे क्षय इति" भा० । ज्योतिषोक्ते ८द्विसंक्रान्तियुक्ते शुक्लप्रतिपदाद्यमावस्यान्ते चान्द्रे मासे यथाह सि०शि०

"असंक्रान्तिमासोऽधिमासः स्फुटं स्याद्द्विसंक्रान्तिमासः क्षयाख्यः कदाचित् । क्षयः कार्त्तिकादित्रये नान्यतः स्यात् तदा वर्षमध्येऽधिमासद्वयं च" ।

"यस्मिन् शशिमासेऽर्कसंक्रान्तिर्नास्ति सोऽधिमास इति प्रसिद्धम् । तथा यत्र मासे संक्रान्तिद्वयं भवति स क्षयमासो ज्ञेयः । यतः संक्रान्त्युपलक्षिता मासाः । अत एकस्मिन् मासे संक्रान्तिद्वये जाते सति मासयुगलं जातम् । स क्षयमासः कदाचित् कालान्तरे भवति । यदा भवति तदा कार्त्तिकादित्रय एव । तदा क्षयमासात् पूर्वं मासत्रयान्तर एकोऽधिमासोऽग्रतश्च मासत्रयान्तरितोऽन्यश्चासंक्रान्तिमासः स्यात् । अत्रोपपत्तिः । चन्द्रमासप्रमाणमेकोनत्रिंशत् सावनदिनान्येकत्रिंशत् घटिकाः पञ्चाशत् पलानि २९।३१।५०। तथार्कमासस्त्रिंशद्दिनानि षड्विंशतिघटिकाः सप्तदशपलानि ३०।२६।१७। एतावद्भिर्दिवसैरविमध्यगत्या राशिं गच्छति । यदार्कगतिरेकषष्टिः कलास्तदा सार्धैकोनत्रिंशता दिनैः २९।३० राशिं गच्छति । अतश्चान्द्रमासादल्पोऽर्कमासस्तदा स्यात् । एवं रविमासस्य परमाल्पता २९।२०।४० । सा चैकषष्टिगतिर्वृश्चिकादित्रयेऽर्कस्य । स ईदृशोऽल्पोऽर्कमासो यदा चन्द्रमासस्यान्तःपाती भवति तदैकस्मिन् मासे संक्रमणद्वयमुपपद्यते । अत उक्तं क्षयः कार्त्तिकादित्रय इति । पूर्वं